শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীভগৱদ্যামুনমুনিভিঃ অনুগৃহীতা

# ॥ শ্রীচতুঃশ্লোকী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীচতুঃশ্লোকী ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

স্বাদযন্নিহ সর্ৱেষাং ত্রয্যন্তার্থং সুদুর্গ্রহম্।
স্তোত্রযামাস যোগীন্দ্রঃ তং ৱন্দে যামুনাহ্ৱযম্॥

যৎপদাম্ভোরুহধ্যানৱিধ্ৱস্তাশেষকল্মষঃ।
ৱস্তুতামুপযাতোঽহং যামুনেযং নমামি তম্॥

নমো নমো যামুনায যামুনায নমো নমঃ।
নমো নমো যামুনায যামুনায নমো নমঃ॥

কান্তস্তে পুরুষোত্তমঃ ফণিপতিঃ শয্যাঽঽসনং ৱাহনং
ৱেদাত্মা ৱিহগেশ্ৱরো যৱনিকা মাযা জগন্মোহিনী।
ব্রহ্মেশাদিসুরব্রজঃ সদযিতস্ত্ৱদ্দাসদাসীগণঃ
শ্রীরিত্যেৱ চ নাম তে ভগৱতি ব্রূমঃ কথং ৎৱাং ৱযম্॥ **1** ॥

যস্যাস্তে মহিমানমাত্মন ইৱ ৎৱদ্ৱল্লভোঽপি প্রভুঃ
নালং মাতুমিযত্তযা নিরৱধিং নিত্যানুকূলংস্ৱতঃ।
তাং ৎৱাং দাস ইতি প্রপন্ন ইতি চ স্তোষ্যাম্যহং নির্ভযঃ
লোকৈকেশ্ৱরি লোকনাথদযিতে দান্তে দযাং তে ৱিদন্॥ **2** ॥

ঈষৎ ৎৱৎকরুণানিরীক্ষণসুধাসন্ধুক্ষণাদ্রক্ষ্যতে
নষ্টং প্রাক্ তদলাভতস্ত্রিভুৱনং সংপ্রত্যনন্তোদযম্।

শ্রেযো ন হ্যরৱিন্দলোচনমনঃকান্তাপ্রসাদাদৃতে
    সংসৃত্যক্ষরৱৈষ্ণৱাধ্ৱসু নৃণাং সংভাৱ্যতে কর্হিচিৎ॥ **3** ॥

শান্তানন্তমহাৱিভূতি পরমং যদ্ব্রহ্ম রূপং হরেঃ
    মূর্তং ব্রহ্ম ততোঽপি তৎপ্রিযতরং রূপং যদত্যদ্ভুতম্।
যান্যন্যানি যথাসুখং ৱিহরতো রূপাণি সর্ৱাণি তানি
    আহুঃ স্বৈরনুরূপরূপৱিভৱৈর্গাঢোপগূঢানি তে॥ **4** ॥

আকারত্রযসম্পন্নাম্ অরৱিন্দনিৱাসিনীম্।
অশেষজগদীশিত্রীম্ ৱন্দে ৱরদৱল্লভাম্॥ **5** ॥

॥ ইতি শ্রীচতুঃশ্লোকী সমাপ্তা ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ ॥